23E/22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : डिसेंबर – २०२३**

**सत्र १ ले**

**विषयः पञ्चतन्त्र–काकोलूकीय** (23E412/22E413)

**दिनांक :१४/१२/२०२३** **गुण :१००** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ अ. त्रयाणां माध्यमभाषया अनुवादं कुरुत।** **(२४)**

१) स आह 'भवतातीतदिवसे यूथेन सहागच्छता प्रभूताः शशका निपातिताः। तत्किं न वेत्ति भवान् यन्मम परिग्रहोऽयम्। तद्यदि जीवितेन ते प्रयोजनं, तदा केनापि प्रयोजनेनात्र ह्रदे नागन्तव्यम्' इति सन्देशः। गज आह, 'अथ क्व वर्तते भगवान् स्वामी चन्द्रः?' स आह, 'अत्र ह्रदे साम्प्रतं शशकानां भवद्यूथमथितानां हतशेषाणां समाश्वासनाय समायातस्तिष्ठति। अहं पुनस्तवान्तिकं प्रेषितः।' गज आह, 'यद्येवं तद् दर्शय मे तं स्वामिनं, येन प्रणम्यान्यत्र गच्छामि।' शशक आह, 'भो! आगच्छ मया सहैकाकी येन दर्शयामि। तथानुष्ठिते शशको निशासमये तं गजं ह्रदतीरे नीत्वा जलमध्ये स्थितं चन्द्रप्रतिबिम्बमदर्शयत्।

२) मेघवर्ण आह–''तात! असिधाराव्रतमिदं मन्ये यदरिणा सह संवासः।'' सोऽब्रवीत्, ''देव! एकमेतत्। परं न तादृङ्मूर्खसमागमः क्वापि मया दृष्टः। न च महाप्रज्ञमनेकशास्त्रेष्वप्रतिमबुद्धिं रक्ताक्षं विना धीमान्। यत्कारणं तेन मदीयं यथा स्थितं चित्तं ज्ञातम्। ये पुनरन्येमहामूर्खमन्त्रिमात्रव्यपदेशोपजीविनोऽतत्त्वकुशलायैरिदमपि न ज्ञातम्।

३) सोऽचिन्तयत्, 'अहो, किमेष सकलपक्षिसमागमो महोत्सवश्च? अथ ते पक्षिणस्तं दृष्ट्वा मिथः प्रोचुः, 'पक्षिणां मध्ये वायसश्चतुरः श्रूयते तदस्यापि वचनं ग्राह्यम्।' अथ वायसः समेत्य तानाह, 'अहो किं महाजनसमागमोऽयं परममहोत्सवश्च?' ते प्रोचुः, 'भो नास्ति कश्चिद्विहङ्गमानां राजा, तदस्योलूकस्य विहङ्गमराज्याभिषेको निरूपितस्तिष्ठति समस्तपक्षिभिः।–तत्त्वमपि स्वमतं देहि, प्रस्तावे समागतोऽसि। अथासौ काको विहस्याऽऽह, 'अहो! न युक्तमेतत्यन्मयूरहंसकोकिलचक्रवाकशुककारण्डवहारीतसारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य करालवक्त्रस्याभिषेकः क्रियते। तन्नैतन्मम मतम्।—

४) न च त्वया प्राप्तराज्योहमितिमत्वाश्रीमदेनात्मा व्यंसयितव्यः। यत्कारणं–चला हि राज्ञो विभूतयः। वंशारोहणवद्राज्यलक्ष्मीर्दुरारोहाक्षणनिपाता च । पारदरसवत्प्रयत्नशतैरपिधार्यमाणादुर्धरा। प्रशस्ताराधिताप्यन्ते विप्रलम्भिनी। वानरजातिरिव विद्रुतानेकचित्ता। पद्मपत्रोदकमिवाघटितसंश्लेषापवनगतिरिवातिचपला। अनार्यसङ्गतिमिवास्थिरा। आशीविष इव दुरुपचारा। जलबुदबुदावलीव स्वभावभङ्गुरा। शरीरप्रकृतिरिव कृतघ्ना। स्वप्रलब्धद्रव्यराशिरिव क्षणदृष्टनष्टा।

**आ. द्वयोः सान्वयमनुवादं कुरुत।** **(१०)**

१. सुविज्ञानाश्छलोत्कटा बहुबुद्धिसमायुक्तः। शक्ता वञ्चयितुं धूर्ता ब्राह्मणं छगलादिव।।

२. बन्धुवर्गवधेष्वपि शस्त्रेषु उद्यतेष्वपि.। परुषाण्यपि जल्पन्तो वध्या दूता न भूभुजा।।

३. साकारो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः। परचित्तावगन्ता च राज्ञो दूतः स इष्यते।।

**प्र.२ दश रूपाणां परिचयं कारयत।** **(१०)**

| | | | |
|---|---|---|---|
| १. अस्ति | २. कन्यायाः | ३. तयोः | ४. ब्राह्मणस्य |
| ५. मम | ६. अस्माभिः | ७. पर्णेषु | ८. नीत्वा |
| ९. दातारम् | १०. तुष्यति | ११. अकथयम् | १२. नष्टा |

**प्र.३. दश सन्धिं सन्धिविग्रहं वा कुरुत।** **(१०)**

| | | |
|---|---|---|
| १.चैव | २. तत् + आरभ्य | ३. जायामाह |
| ४. मन्त्रिणाभिहितम् | ५. सुरैर्भुक्ता | ६. तान्+एव |
| ७. प्रहरन्ति+अरयः=--- | ८. कस्त्वम् | ९. बुद्धिमान्नरः |
| १०. भूयोऽपि | ११. सः+अपि=---- | |

**प्र.४. दश वाक्यानि सूचनानुसारं परिवर्तयत।** **(१०)**

१. ब्राह्मणः कथयति स्म।(स्म निष्कासयत।)
२. अपरं यदि तस्य छिद्रं पश्यसि तद्गत्वा व्यापादयिष्यसि।(भवान् इति कर्तृपदं योजयत।)
३. चन्द्रेण अहं प्रेषितः।(वाच्यपरिवर्तनं कुरुत।)
४. वयं रात्रौ न पश्यामः स्म। (वाक्यम् एकवचने परिवर्तयत ।)
५. तस्मात्……… सह योद्धव्यम्।(तद् इति सर्वनाम्नः योग्यं रूपं लिखत।)
६. ……. विना न कश्चित्प्रतीकारो भवति।('संश्रय' इति पदस्य योग्यं रूपं लिखत।)
७. त्वमपि स्वाभिप्रायं वद।(त्वं स्थाने भवान् इति कर्तृपदं योजयत।।)
८. त्वं स्वस्थानं त्यक्त्वा अन्यत्र यास्यसि। (लट्लकारे परिवर्तयत।)
९. सः तं वायसं व्यापाद्य गच्छति। (द्विवचने परिवर्तयत।)
१०. शशकाः सुखेन वसन्ति (लङ्लकारे परिवर्तयत।)
११. अहं सम्यक् ज्ञातवान्।(वाच्यपरिवर्तनं कुरुत।)

**प्र.५. द्वे वाक्ये ससन्दर्भं स्पष्टीकुरुत।** **(२०)**

१. स्वजातिर्दुरतिक्रमा।
२. भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्।
३. शत्रवोऽपि हितायैव विवदन्तः परस्परम्।

**प्र.६. पञ्चतन्त्रस्थां कामपि कथां स्वभाषया संस्कृतेन लिखत।** **(१६)**

----------